# Shrinivasastotram

# શ્રીનિવાસસ્તોત્રમ્

## Document Information

Text title : shrInivAsastotram

File name : shrInivAsastotram.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીનિવાસસ્તોત્રમ્

અથ વિબુધવિલાસિનીષુ વિષ્વઙ્મુનિમભિતઃ પરિવાર્ય તસ્થુષીષુ ।
મદવિહૃતિવિકત્થનપ્રલાપાસ્વવમતિનિર્મિતનૈજચાપલાસુ ॥ ૧॥

ત્રિભુવનમુદમુદ્યતાસુ કર્તું મધુસહસાગતિસર્વનિર્વહાસુ ।
મધુરસભરિતાખિલાત્મભાવાસ્વગણિતભીતિષુ શાપતશ્શુકસ્ય ॥ ૨॥

અતિવિમલમતિર્મહાનુભાવો મુનિરપિ શાન્તમના નિજાત્મગુપ્ત્યૈ ।
અખિલભુવનરક્ષકસ્ય વિષ્ણોઃ સ્તુતિમથ કર્તુમના મનાગ્બભૂવ ॥ ૩॥

શ્રિયઃશ્રિયં ષડ્ગુણપૂરપૂર્ણં શ્રીવત્સચિહ્નં પુરુષં પુરાણમ્ ।
શ્રીકણ્ઠપૂર્વામરવૃન્દવન્દ્યં શ્રિયઃપતિં તં શરણં પ્રપદ્યે ॥ ૪॥

વિભું હૃદિ સ્વં ભુવનેશમીડ્યં નીળાશ્રયં નિર્મલચિત્તચિન્ત્યમ્ ।
પરાત્પરં પામરપારમેનમુપેન્દ્રમૂર્તિં શરણં પ્રપદ્યે ॥ ૫॥

સ્મેરાતસીસૂનસમાનકાન્તિં સુરક્તપદ્મપ્રભપાદહસ્તમ્ ।
ઉન્નિદ્રપઙ્કેરુહચારુનેત્રં પવિત્રપાણિં શરણં પ્રપદ્યે ॥ ૬॥

સહસ્રભાનુપ્રતિમોપલૌઘસ્ફુરત્કિરીટપ્રવરોત્તમાઙ્ગમ્ ।
પ્રવાલમુક્તાનવરત્નહારતારં હરિં તં શરણં પ્રપદ્યે ॥ ૭॥

પુરા રજોદુષ્ટધિયો વિધાતુરપાહૃતાન્ યો મધુકૈટભાભ્યામ્ ।
વેદાનુપાદાય દદૌ ચ તસ્મૈ તં મત્સ્યરૂપં શરણં પ્રપદ્યે ॥ ૮॥

પયોધિમધ્યેઽપિ ચ મન્દરાદ્રિં ધર્તું ચ યઃ કૂર્મવપુર્બભૂવ ।
સુધાં સુરાણામવનાર્થમિચ્છંસ્તમાદિદેવં શરણં પ્રપદ્યે ॥ ૯॥

વસુન્ધરામન્તરદૈત્યપીડાં (?) રસાતલાન્તર્વિવશાભિવિષ્ટામ્ ।
ઉદ્ધારણાર્થં ચ વરાહ આસીચ્ચતુર્ભુજં તં શરણં પ્રપદ્યે ॥ ૧૦॥

નખૈર્વરૈસ્તીક્ષ્ણમુખૈર્હિરણ્યમરાતિમામર્દિતસર્વસત્ત્વમ્ ।
વિદારયામાસ ચ યો નૃસિંહો હિરણ્યગર્ભં શરણં પ્રપદ્યે ॥ ૧૧॥

મહન્મ હત્વેન્દ્રિયપઞ્ચભૂતતન્માત્રમાત્રપ્રકૃતિઃ પુરાણી ।
યતઃ પ્રસૂતા પુરુષાસ્તદાત્મા તમાત્મનાથં શરણં પ્રપદ્યે ॥ ૧૨॥

પુરા ય એતસ્તકલં બભૂવ યેનાપિ તદ્યત્ર ચ લીનમેતત્ ।
આસ્તાં યતોઽનુગ્રહનિગ્રહૌ ચ તં શ્રીનિવાસં શરણં પ્રપદ્યે ॥ ૧૩॥

નિરામયં નિશ્ચલનીરરાશિનીકાશસદ્રૂપમયં મહસ્તત્ ।
નિયન્તુ નિર્ભાતૃ નિહન્તુ નિત્યં નિદ્રાન્તમેનં શરણં પ્રપદ્યે ॥ ૧૪॥

જગન્તિ યઃ સ્થાવરજઙ્ગમાનિ સંહૃત્ય સર્વાણ્યુદરેશયાનિ ।
એકાર્ણવાન્તર્વટપત્રતલ્પે સ્વપિત્યનન્તં શરણં પ્રપદ્યે ॥ ૧૫॥

નિરસ્તદુઃખૌઘમતીન્દ્રિયં તં નિષ્કારણં નિષ્કલમપ્રમેયમ્ ।
અણોરણીયાંસમનન્તમન્તરાત્માનુભાવં શરણં પ્રપદ્યે ॥ ૧૬॥

સમામ્બુજીરઞ્જકરાજહાસં સમાર્ણવીસંસૃતિકર્ણધારમ્ ।
સમાશ્વબિમ્બાશ્વહિરણ્મયં તં સમાર્ચિરઙ્ગં શરણં પ્રપદ્યે ॥ ૧૭॥

નિરાગસં નિર્મલપૂર્ણબિમ્બં નિશીથિનીનાથનિભાનનાભમ્ ।
નિર્ણીતનિદ્રં નિગમાન્તનિત્યં નિઃશ્રેયસં તં શરણં પ્રપદ્યે ॥ ૧૮॥

નિરામયં નિર્મલમપ્રમેયં નિજાન્તરારોપિતવિશ્વબિમ્બમ્ ।
નિસ્સીમકલ્યાણગુણાત્મભૂતિં નિધિં નિધીનાં શરણં પ્રપદ્યે ॥ ૧૯॥

ત્વક્ચર્મમાંસાસ્થ્યસૃગશ્રુમૂત્રશ્લેષ્માન્ત્રવિટ્ચ્છુક્લસમુચ્ચયેષુ ।
દેહેષ્વસારેષુ ન મે સ્પૃહૈષા ધ્રુવં ધ્રુવં ત્વં ભગવન્ પ્રસીદ ॥ ૨૦॥

ગોવિન્દ કેશવ જનાર્દન વાસુદેવ વિશ્વેશ વિશ્વ મધુસૂદન વિશ્વરૂપ
શ્રીપદ્મનાભ પુરુષોત્તમ પુષ્કરાક્ષ નારાયણાચ્યુત નૃસિંહ નમો નમસ્તે ॥ ૨૧॥

દેવાઃ સમસ્તામરયોગિમુખ્યાઃ ગન્ધર્વવિદ્યાધરકિન્નરાશ્ચ ।
યત્પાદમૂલં સતતં નમન્તિ તં નારસિંહં શરણં પ્રપદ્યે ॥ ૨૨॥

વેદાન્ સમસ્તાન્ ખલુ શાસ્ત્રગર્ભાન્ આયુઃ સ્થિરં કીર્તિમતીવ લક્ષ્મીમ્ ।
યસ્ય પ્રસાદાત્ પુરુષા લભન્તે તં નારસિંહં શરણં પ્રપદ્યે ॥ ૨૩॥

બ્રહ્મા શિવસ્ત્વં પુરુષોત્તમશ્ચ નારાયણોઽસૌ મરુતામ્પતિશ્ચ ।
ચન્દ્રાર્કવાય્વગ્નિમરુદ્ગણાશ્ચ ત્વમેવ નાન્યત્ સતતં નતોઽસ્મિ ॥ ૨૪॥

સ્રષ્ટા ચ નિત્યં જગતામધીશઃ ત્રાતા ચ હન્તા વિભુરપ્રમેયઃ
એકસ્ત્વમેવ ત્રિવિધા વિભિન્નઃ ત્વાં સિંહમૂર્તિં સતતં નતોઽસ્મિ ॥ ૨૫॥

॥ હરિઃ ૐ શુભમસ્તુ ॥

॥ ઇતિ શ્રીનિવાસસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

*Shrinivasastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*